International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# महाभारतीय स्तुतिसाहित्ये देवीदुर्गायाः स्तुतिवर्णना:

# Mahabharatiya Stutisahitye Devidurgayah Stutivarnana

## डॉ सङ्गीता मण्डल

वीरभूम्, पश्चिमवङ्गम्

**सारसंक्षेपः**

महाभारते विविधेषु प्रसङ्गेषु देवीदुर्गायाः स्तुतयः दृश्यन्ते, यत्र सा शक्तिरूपेण, रक्षिका, दुष्टसंहारिणी तथा भक्तवत्सला इति रूपेण निरूपिता अस्ति। विशेषतः भीष्मपर्वे तथा विराटपर्वे अर्जुनस्य कृतं दुर्गास्तवनं प्रसिद्धं अस्ति, यत्र सः युद्धे विजयप्राप्तये देव्या आश्रयं याचते। एतत् स्तुतिसाहित्यं केवलं धार्मिकभक्तेः अभिव्यक्तिमात्रं न, अपितु तदा प्रचलितानां दार्शनिक, सामाजिक तथा सांस्कृतिक मूल्यानां दर्पणरूपेण अपि कार्यं करोति। देवीदुर्गा महाभारते आद्यशक्तिरूपेण प्रतिष्ठिता अस्ति, या विश्वस्य सृष्टि-स्थिति-लयकारिणी इति भावेन पूज्यते। तस्याः स्तुतिषु अलंकारिकता, भावगाम्भीर्यं तथा काव्यसौन्दर्यं विशेषतया दृष्टव्यं अस्ति। अतः महाभारतीय स्तुतिसाहित्ये देवीदुर्गायाः स्तुतिवर्णनं भारतीय आध्यात्मिकतायाः, भक्तिपरम्परायाः तथा साहित्यिकपरिष्कारस्य समन्वितं चित्रं प्रस्तुतं करोति, यत् अद्यापि भारतीयसंस्कृतेः एकं प्रेरणास्रोतः अस्ति।

**मुख्यशव्दः** देवीदुर्गायाः स्तुतयः, दुष्टसंहारिणी, आद्यशक्तिरूपेण प्रतिष्ठिता, भक्तिपरम्परायाः

भारतीयसाहित्यपरम्परायां स्तुतिसाहित्यस्य विशेषं स्थानं विद्यते। वेदेषु रामायणेषु च देवानां स्तुतिः मानवदैवतयोः सम्बन्धस्य सेतुचित्रमासीत् । तदनुसारं महाभारतेऽपि विविधसमस्यासमाधानाय देव-दानव-मानवानां ब्रह्माविष्णुमहेश्वरादीनां कृते स्तुतिसमूहः प्राप्यते । सर्वे महाभारतस्य भक्ति-स्तुत्यादि-प्रसङ्गेभ्यो अवश्यमेव प्रेरणां प्राप्तवन्तः । महाभारते देवीदुर्गायाः स्तुतिवर्णनं विशेषमहत्त्वं वहति। सा आद्यशक्तिरूपेण, दुष्टसंहारिणी, भक्तरक्षिका तथा विश्वव्यापिनी शक्तिः इति भावेन निरूपिता अस्ति। विशेषतः अर्जुनस्य कृतं दुर्गास्तवनं, यत् युद्धपूर्वसन्दर्भे दृश्यते, देव्या अनुग्रहस्य अनिवार्यतां प्रतिपादयति। एतेषु स्तुतिषु केवलं धार्मिकश्रद्धा न, अपितु काव्यसौन्दर्यं, अलंकारवैचित्र्यं तथा भावगाम्भीर्यं अपि सम्यक् अभिव्यक्तं भवति। विराट-भीष्म-पर्वणोः दुर्गास्तुतिः प्रसिद्धा एव । सा स्तुतिः भक्तिभावं जागरयति।

विराटनगरं प्रविश्य महाराजः युधिष्ठिरः त्रिभूवनेश्वरीं दुर्गादेवीं स्तौति । अत्र दुर्गादेव्याः माहात्म्यं, स्वरूपं, वैशिष्टानि च

कीर्तयति । सा स्तुतिः पवित्रा भक्तियुक्ता च । सा यशोदागर्भसम्भूता, हरिप्रिया, कुलवर्धिनी, असुरसंहारिका, दिव्यमाल्यविभूषिता, दिव्याम्बरधारिणी, खडगिनी, खेटकधारिणी, भारावतरणकारिणी, सदा कल्याणकारिणी –

यशोदागर्भसम्भूतां नारायणवरप्रियाम् । नन्दगोपकुले जातां मङ्गल्यां कुलवर्धिनीम् ।।
वासुदेवस्य भगिनीं दिव्यमाल्यविभूषिताम्।दिव्याम्बरधरां देवीं खडगखेटकधारिणीम्।।
(विराट, 6.2,4).

सा हि कुमारी, ब्रह्मचारिणी, अंगकान्तिः प्रभातसूर्यसदृशी रक्तवर्णा, तस्या वदनं पूर्णचन्द्रसदृशं, सा च ह्लादिनी । सा चतुर्भुजसुशोभिता विष्णुरूपा, चतुर्मुखेनालंकृता ब्रह्मस्वरूपा, पीनोन्नतपयोधरा, भगवतः नारायणस्य धर्मपत्नी लक्ष्मीसदृशी तस्या शोभा । श्यामसुन्दर- श्रीकृष्णच्छविसमा श्यामकान्तिः, अतः सा कृष्णा । तस्या मुखं संकर्षणसदृशम् । तस्या विपुलौ बाहू इन्द्रध्वजसमुच्छ्रयौ । तस्या तृतीयहस्ते पात्रं चतुर्थहस्ते कमलं, पञ्चमहस्ते घण्टी, षष्ठहस्ते पाशं, सप्तमहस्ते धनुः, अष्टमहस्ते महाचक्रं शोभन्ते । इमानि तस्या विविधानि आयुधानि । सा हि विशुद्धा स्त्रीस्वरूपा । कुण्डलमण्डितः कर्णयुगलौ तस्या मुखमण्डलस्य शोभां वर्धयतः । तस्या मस्तकोपरि विचित्रं मुकुटं, केशवेणी, कटिमेखला इत्यादयः देहसौष्ठवं वर्धयन्ति –

स्वरूपं ब्रह्मचर्यं च विशदं गगनेश्वरी ।
कृष्णच्छविसमा कृष्णा संकर्षणसमानना ।।
बिभ्रती विपुलौ बाहू शक्रध्वजसमुच्छयौ ।
पात्री च पङ्कजी घण्टी स्त्रीविशुद्धा च या भुवि ।।
पाशं धनुर्महाचक्रं विविधान्यायुधानि च ।
कुण्डलाभ्यां सुपूर्णाभ्यां कर्णाभ्यां च विभूषिता ।। (विराट, 6.9-11)

सा ब्रह्मचर्यव्रतपालनेन त्रिदिवं शुद्धीकरोति, महिषासुरमर्दिनी, जया विजया च । पर्वतश्रेष्ठो विन्ध्याचले तस्या निवासः । सा काली, महाकाली, खड्गखट्वांगधारिणी, मनोवाञ्छितवरप्रदायिनी । य नियतं प्रातः तां भक्त्या एव स्मरति सर्वसिद्धिर्जायते तस्य इत्यत्र नास्ति संशयः । स दुःसहदुःखाज् जनान् उद्धरति अतः सा दुर्गा । जलप्रतरणे, दुर्गममार्गे यात्रावसरे, वनमध्ये प्रवेशसमये य दुर्गादेवीं भक्त्या स्मरेत् सः कदापि क्लेशं नानुभवति । सा हि पद्मपलाशाक्षी, सत्यस्वरूपा, भक्तवत्सला । अतः युधिष्ठिरस्य स्तुत्या प्रसन्ना सती देवी दुर्गा प्रत्यक्षस्वरूपं दर्शयति –

दुर्गात् तारयसे दुर्गे तत् त्वं दुर्गा स्मृता जनैः। कान्तारेष्ववसन्नानां मग्नानां च महार्णवे ।।
दस्युभिर्वा निरुद्धानां त्वं गतिः परमा नृणाम् । जलप्रतरणे चैव कान्तारेष्वटवीषु च ।।
प्रणतश्च यथा मूर्ध्ना तव देवि सुरेश्वरि । त्राहि मां पद्मपत्राक्षि सत्ये सत्या भवस्व नः ।।
शरणं भव मे दुर्गे शरण्ये भक्तवत्सले । एवं स्तुता हि सा देवी दर्शयामास पाण्डवम् ।।
(विराट, 6.20,21,25,26).

भीष्मपर्वणि त्रयोविंशे अध्याये युद्धात् पूर्वं भगवता श्रीकृष्णेन उपदिष्टो भूत्वा अर्जुनः श्रीदुर्गास्तुतिम् करोति । तस्या वैशिष्टानि अत्र वर्ण्यते । सा मन्दराचलवासिनी, सिद्धसेनानी, कुमारी, काली, कपाली, कृष्णपिंगला, भद्रकाली, महाकाल्यादिनाम्ना प्रसिद्धा । दुष्टोपरि कोपात् सा चण्डी, भक्तस्य संकटतारणात् सा तारिणी –

नमस्ते सिद्धसेनानि आर्ये मन्दरवासिनि । कुमारि कालि कापालि कपिले कृष्णपिंगले ।।
भद्रकालि नमस्तुभ्यं महाकालि नमोऽस्तु ते।चण्डि चण्डे नमस्तुभ्यं तारिणि वरवर्णिनि।।
(भीष्म, 23.4,5).

सा सौम्यसुन्दररूपात् कात्यायनी, कराली, शिखिपिच्छशोभिता तस्या ध्वजा, नानाभरणभूषिता, नन्दीगोपवंशे अवताराद्धेतोः सा श्रीकृष्णस्य अनुजा । कुशिकगोत्रे अवतारकारणात् सा कौशिकी, पीताम्बरधारिणी, अट्टहासकाले तस्या मुखं चक्रवाकसदृशम् । सा युद्धप्रिया । सा हि उमा, शाकम्भरी, श्वेता, कैटभनाशिनी, हिरण्याक्षी, विरूपाक्षी, सुधूम्राक्षी इत्यादिभिः नामभिः प्रसिद्धाः –

कात्यायानि महाभागे करालि विजये जये । शिखिपिच्छध्वजधरे नानाभरणभूषिते ।।
महिषासृक्प्रिये नित्यं कौशिकि पीतवासिनि । अट्टहासे कोकमुखे नमस्तेऽस्तु रणप्रिये ।।
उमे शाकम्भरि श्वेते कृष्णे कैटभनाशिनि।हिरण्याक्षि विरूपाक्षि सुधूम्राक्षि नमोऽस्तु ते।।
गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे ।। (भीष्म, 23.6,8,9,7).

सा वेदश्रुतिः, महापुण्या, जातवेदा, जम्बूकटकचैत्येषु स नित्यं वसति । सर्वविद्यानां ब्रह्मविद्या, देहिनां महानिद्रा, स्कन्दमाता । दुर्गमस्थाने निवासाद्धेतोः सा दुर्गा । स्वाहा, स्वधा, कला, काष्ठा, सरस्वती, वेदमाता तथा वेदान्तप्रभृतिभिः विशेषणैः सा विभूषिता । घोरारण्ये, भयदुर्गेषु, भक्तानां गृहेषु तथा पातालेषु सा नित्यं वसति । युद्धे दानवान् सा पराजयते । सा जम्भनी, मोहिनी, माया, ह्रीः, श्रीः, संध्या, प्रभावती, सावित्री, जननी, तुष्टिः, पुष्टिः, धृतिः तथा दीप्तिः। ऐश्वर्यवतः सा विभूतिः । युद्धभूमौ सिद्धचारणैः सा परिदृश्यते –

वेदश्रुति महापुण्ये ब्रह्मण्ये जातवेदसि । जम्बुकटकचैत्येषु नित्यं सन्निहितालये ।।
त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्। स्कन्दमातर्भवति दुर्गे कान्तारवासिनि ।।
कान्तारभयदुर्गेषु भक्तानां चालयेषु च । नित्यं वससि पाताले युद्धे जयसि दानवान् ।।
तुष्टिः पुष्टिर्धृतिर्दीप्तिश्चन्द्रादित्यविवर्धिनी ।भूतिर्भूतिमतां सङ्ख्ये वीक्ष्यसे सिद्धचारणैः।।
(भीष्म, 23.10,11,14,16).

सर्वे मुनयः ऋग्मन्त्रसहयोगेन सुशोभितवाण्या अर्थयुक्तस्तोत्रेण पार्वतीदेव्याः स्तुतिं कुर्वन्ति –

ततो मुनिगणः सर्वस्तां देवीं प्रत्यपूजयत् ।
वाग्भिर्ऋग्भूषितार्थाभिः स्तवैश्चार्थविशारदैः ।। (अनुशासन्, 141.24)

एतदुपरि पर्यालोचनायाम् एतासां स्तुतीनां साहित्यिकमूल्यं समुच्चमस्ति । अस्य स्तुतिसाहित्यस्य माध्यमेन तदा प्रचलिताः धार्मिकधारणाः, शक्तिपूजाया महत्त्वं तथा स्त्रीशक्तेः उच्चस्थानं समाजे स्थापितं भवति। देवीदुर्गा आदिशक्तिरूपेण सृष्टि-स्थिति-लयस्य नियन्त्रिका इति भावः अपि सुस्पष्टः अस्ति। महाभारतीय स्तुतिसाहित्ये देवीदुर्गायाः स्तुतिवर्णनं न केवलं भक्तिकाव्यस्य उत्कृष्टं उदाहरणम्, अपितु भारतीयसंस्कृतेः दार्शनिकगाम्भीर्यं, आध्यात्मिकचिन्तनं तथा काव्यसौन्दर्यं समन्वयेन प्रकाशयति। अनेन स्तुतिसाहित्येन परवर्त्तिस्तोत्रसाहित्यं समुद्भूतमस्ति ।

## सन्दर्भसूचीः-

1. श्रीमन्महर्षि वेदव्यासप्रणीत महाभारतम्, प्रकाशकः – गोविन्दभवन कार्यालय, गीताप्रेस, गोरखपुरम्, षोडशसंस्करणम्, 2075 संवत्सरम्.